॥ अथ श्रीजितंतेस्तोत्रम् ॥

ब्रह्मोवाच ॥ जितं त पुंडरीकाक्ष पूर्णषाड्गुण्यविग्रह । परानंद परं ब्रह्म नमस्ते चतुरात्मने ॥१॥ नमस्ते पीतवसन नमः कटकधारिणे । नमो नीलालकाबद्धवेणीसुंदरपुंगव ॥ २ ॥ स्फुरद्वलय केयूर-नूपुरांगदभूषणैः । शोभनैर्भूषिताकारकल्याणगुणराशये ॥ ३ ॥ करुणापूर्णहृदय शंखचक्रगदाधर । अमृतानंदपूर्णाभ्यां लोचनाभ्यां विलोकय ॥ ४ ॥ कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम् । अपराधसहस्राणामाकरं करुणाकर ॥ ५ ॥ कृपया मां केवलया गृहाण मधुराधिप । विषयार्णवमग्नं मामुद्धर्तुं त्वमिहार्हसि ॥ ६ ॥ पिता माता सुहृद्बंधुर्भ्राता पुत्रस्त्वमेव मे । विद्या धनं च कामश्च नान्यत् किंचित्त्वया विना । ॥ ७ ॥ यत्र कुत्र कुले वासो येषु केषु भवोऽस्तु मे । तव दास्यैकभावे स्यात् सदा सर्वत्र मे रतिः ॥ ८ ॥ मनसा कर्मणा वाचा शिरसा वा कथंचन । त्वां विना नान्यमुद्दिश्य करिष्ये किंचिदप्यहम् ॥ ९ ॥ पाहि पाहि जगन्नाथ कृपया भक्तवत्सल । अनाथोऽहमधन्योऽहमकृतार्थो ह्यकिंचनः ॥ १० ॥ नृशंसः पापकृत् क्रूरो वंचको निष्ठुरः शठः । भवार्णवनिमग्नं मामनन्यकरुणोदधे ॥ ११ ॥ करुणापूर्णदृष्टिभ्यां दीनं मामवलोकय । त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो ॥ १२ ॥ मया कृतानि पापानि त्रिविधानि पुनः पुनः । त्वत्पादपंकजं प्राप्तुं नन्यत्त्वत्करुणां विना ॥१३॥ साधनानि प्रसिद्धानि यागादीन्यव्जलोचन । त्वदाज्ञया प्रयुक्तानि त्वामुद्दिश्य कृतानि वै ॥ १४ ॥ भक्त्यैकलभ्यः पुरुषोत्तमो हि जगत्प्रसूतिस्थितिनाशहेतुः । अकिंचनं नान्यगतिं शरण्य गृहाण मां क्लेशिनमंबुजाक्ष ॥ १५ ॥ धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन । त्वत्पादपंकजं साधोर्जीवितं दीयतां मम ॥ १६ ॥

कामये तावकत्वेन परिचर्यासु वर्तनम् । नित्यं किंकरभावेन परिगृह्णीष्व मां विभो ॥ १७ ॥ लोकं वैकुंठनामानं दिव्यं षाड्गुण्यसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितं ॥ १८ ॥ नित्यसिद्धैः समाकीर्णं त्वन्मयैः पांचकालिकैः । सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभैः ॥ १९ ॥ वापीकूपतटाकैश्च वृक्षखंडैः सुमंडितम् । अप्राकृतसुरैर्वंद्यमयुतार्कसमप्रभम् ॥ २० ॥ प्रकृष्टसत्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा । क्रीडंतं रमया सार्धं लीलाभूमिषु केशवम् ॥ २१ ॥ मेघश्यामं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा । उन्नसं चारुदशनं बिंबोष्ठं च शुभाननम् ॥ २२ ॥ विशालवक्षसं श्रीशं कंबुग्रीवं जगद्गुरुम् । आजानुबाहुपरिघमुन्नतांसं मधुद्विषम् ॥ २३ ॥ तनूदरं निम्ननाभिमापीनजघनं हरिम् । करभोरुं श्रियः कांतं कदा द्रक्ष्यामि चक्षुषा ॥ २४ ॥ शंखचक्रगदापद्मैरंकितं पादपंकजम् । शरच्चंद्रशता क्रांतनखराजिविराजितम् ॥ २५ ॥ सुरासुरैर्वंद्यमानमृषिभिर्वंदितं सदा । मूर्धानं मामकं देव तावकं मंडयिष्यति ॥ २६ ॥ कदा गंभीरया वाचा श्रिया मुक्तो जगत्पते । चामरव्यग्रहस्तं मामेवं कुर्विति वक्ष्यसि ॥ २७ ॥ कदाहं राजराजेन गणनाथेन नोदितः । चरेयं भगवत्पादपरिचर्यानुवृत्तिषु ॥ २८ ॥ शांताय सुविशुद्धाय तेजसे परमात्मने । नमः सर्वगुणातीतषाड्गुण्यायादिवेधसे ॥ २९ ॥ सत्यज्ञानानंतगुणब्रह्मणे चतुरात्मने । नमो भगवते विष्णो वासुदेवाभिधत्ते ॥ ३० ॥ चतुःपंचनवव्यूहदशद्वादशमूर्तये । नमोऽनंताय विश्वाय विश्वातीताय चक्रिणे ॥ ३१ ॥ नमस्ते पंचकालज्ञ पंचकालपरायण । पंचकालैकमनसां त्वमेव गतिरव्ययः ॥ ३२ ॥ स्वमहिम्नि स्थितं देवं निर्विकारं निरंजनम् । अप्रमेय-

मजं विष्णुं शरणं त्वां नतोऽस्म्यहम् ॥ ३३ ॥ गुणातीतं परं शांतमव्जनाभं सुरेश्वरम् । तुरीयाद्यतिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम् ॥ ३४ ॥ विश्वरूपं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा । मोक्षं सालोक्यसारूप्यं प्रार्थये न धराधर ॥ ३५ ॥ इच्छामि हि महाभाग कारुण्यं तव सुव्रत । सकलावरणातीत किंकरोऽस्मि तवानघ ॥ ३६ ॥ पुनः पुनः किंकरोस्मि तवाहं पुरुषोत्तम । आसनाद्यनुयागांतमर्चनं यन्मया कृतम् ॥ ३७ ॥ भोगहीनं क्रियाहीनं मंत्रहीनमभक्तिकम् । तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु ॥ ३८ ॥ इति स्तोत्रेण देवेशं स्तुत्वा मधुनिघातिनम् ॥ यागावसानसमये देवदेवस्य चक्रिणः । नित्यं किंकरभावेन स्वात्मानं विनिवेदयेत् ॥ ३९ ॥

॥ श्रीपंचरात्रागमे श्रीमदष्टाक्षरकल्पे जितंतेस्तोत्रे प्रथमाध्यायः ॥

श्रीब्रह्मोवाच ॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ १ ॥ विज्ञापनमिदं देव श्रुणुष्व पुरुषोत्तम ॥ नरनारायणाभ्यां च श्वेतद्वीपनिवासिभिः ॥ २ ॥ नारदाद्यैर्मुनिगणैः सनकाद्यैश्च योगिभिः ॥ ब्रह्मेशाद्यैः सुरगणैः पंचकालयरायणैः ॥ ३ ॥ पूज्यसे पुंडरीकाक्ष दिव्यैर्मन्त्रैर्महात्मभिः ॥ पाषंडधर्मसंकीर्णे भगवद्भक्तिवर्जिते ॥ ४ ॥ कलौ जातोस्मि देवेश सर्वधर्मबहिष्कृते ॥ कथं त्वामसदाचारः पापप्रसवभूरुहः ॥ ५ ॥ अर्चयामि दयासिंधो पाहि मां शरणागतं ॥ तापत्रयदवाग्नौ मां दह्यमानं सदा विभो ॥ ६ ॥ पाहि मां पुंडरीकाक्ष केवलं कृपया तव ॥ जन्ममृत्युजराव्याधिदुःखसंतप्तदेहिनं ॥ ७ ॥ पालय स्वदृशा देव तव कारुण्यगर्भया ॥ इंद्रियाणि मया जेतुमशक्यं पुरुषोत्तम ॥ ८ ॥ शरीरं मम देवेश व्याधिभिः परिपीडितं ॥ मनो मे पुंडरीकाक्ष

विषयानेव धावति ॥ ९ ॥ वाणी मम हृषीकेश मिथ्यापारुष्यदूषिता । एवं साधनहीनोहं किं करिष्यामि केशव ॥ १० ॥ रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा । अपराधसहस्राणां सहस्रमयुतं तथा ॥ ११ ॥ अर्बुदं चाप्यसंख्येयं करुणाब्धे क्षमस्व मे । यच्चापराधं कृतवानज्ञानात्पुरुषोत्तम ॥१२॥ भक्तस्य मम देवेश तत्सर्वंक्षंतुमर्हसि । अज्ञत्वादल्पशक्तित्वादालस्याद्दुष्टभावनात् ॥ १३ ॥ कृतापराधं कृपणं क्षंतुमर्हसि मां विभो । अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ १४ ॥ तानि सर्वाणि मे देव क्षमस्व मधुसूदन । यज्जन्मनः प्रभृति मोहवशंगतेन नानापराधशतमाचरितं मया ते ॥ १५ ॥ अंतर्बहिश्च सकलं तव पश्यतोपि क्षंतुं त्वमर्हसि हरे करुणावशेन । कर्मणा मनसा वाचा या चेष्टा मम नित्यशः । केशवाराधने सा स्याज्जन्मजन्मांतरेष्वपि ॥ १६ ॥

॥ इति श्रीपंचरात्रागमे श्रीमदष्टाक्षरकल्पे जितंतेस्तोत्रे द्वितीयोध्यायः ॥

श्रीब्रह्मोवाच ॥ जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुषपूर्वज ॥ १ ॥ नमस्ते वासुदेवाय शांतानन्द चिदात्मने । अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ॥२ अच्युतायाविकाराय तेजसां निधये नमः । क्लेशकर्माद्यसंस्पृष्टपूर्णषाड्गुण्यमूर्तये ॥ ३ ॥ नित्यज्ञानबलैश्वर्य वीर्यशक्त्योजसां युगैः । त्रियुगाय नमस्तेऽस्तु नमस्ते चतुरात्मने ॥ ४ ॥ प्रधानपुरुषेशाय नमस्ते पुरुषोत्तम । चतुःपञ्चनवव्यूह दशद्वादशमूर्तये ॥ ५ ॥ अनेकमूर्तये तुभ्यममूर्तायैकमूर्तये । नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ॥ ६ ॥ सुभ्रूललाटसुनससुस्मिताधरविद्रुम । पीनवृत्तायतभुज श्रीवत्स-

कृतभूषण ॥ ७ ॥ तनुमध्यमहावक्षः पद्मनाभ नमोऽस्तुते । विलासविक्रमाक्रान्त त्रैलोक्यचरणाम्बुज ॥८
नमस्ते पीतवसन स्फुरन्मकरकुंडल । स्फुरत्किरीटकेयूरहारकौस्तुभभूषण ॥ ९ ॥ पंचायुध नमस्तेस्तु
नमस्ते पांचकालिक । पंचकालरतैकांत योगक्षेमं वह प्रभो ॥ १० ॥ नित्यज्ञानबलैश्वर्य भोगोपकरणा-
च्युत । नमस्ते ब्रह्मरुद्रादिलोकयात्राप्रवर्तक ॥ ११ ॥ जन्मप्रभृतिदासोऽस्मि शिष्योऽस्मि तनयोस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥ १२ ॥ अपि त्वां भगवान्ब्रह्माशर्वशक्रमहर्षयः । द्रष्टुं
यष्टुमभिष्टोतुमद्यापीश न हीशते ॥ १३ ॥ तापत्रयमहाग्राहभीषणे भवसागरे । मज्जतां नाथनौरेषा
प्रणतिस्तुत्वदर्पिता ॥ १४ ॥ अनाथाय जगन्नाथ शरण्यशरणार्थिने । प्रसीद सीदते मह्यं मुह्यते भक्त-
वत्सल ॥ १५ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं यदर्चनम् । तत्क्षंतव्यं प्रपन्नानामपराधं सहिष्यसि १६
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत । किंकरोस्मि हृषीकेश भूयोभूयोऽस्मि किंकरः ॥ १७ ॥
एकत्रिचतुरत्यन्तचेष्टायेष्टाकृते सदा । व्यक्तषाड्गुण्यतत्वाय चतुरात्मात्मने नमः ॥ १८ ॥

॥ इति श्रीपंचरात्रागमे श्रीमदष्टाक्षरकल्पे जितंतेस्तोत्रे तृतीयोध्यायः ॥

श्रीब्रह्मोवाच ॥ जितंते पुंडरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुषपूर्वज ॥१
देवानां दानवानां च सामान्यमधिदैवतम् । सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥ २ ॥ एकस्त्वमसि-
लोकस्य स्रष्टा संहारकस्तथा । अध्यक्षस्त्वनुमन्ता च गुणमायासमावृतः ॥ ३ ॥ संसारसागरं घोरमनंतं
क्लेशभाजनम् ॥ ४ ॥ न ते रूपं न चाकारो नायुधानि न चास्पदम् । तथापि पुरुषाकारो भक्तानां

त्वं प्रकाशसे ॥ ५ ॥ नैव किंचित्परोक्षं ते प्रत्यक्षोसि न कस्यचित् । नैव किंचिदसिद्धं ते न च सिद्धोसि कस्यचित् ॥ ६ ॥ कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् । योगिनां परमां सिद्धं परमं ते पदं विदुः ॥ ७ ॥ अहं भीतोऽस्मि देवेश संसारेऽस्मिन्महावने । पाहि मां पुंडरीकाक्ष न जाने शरणं परम् ॥ ८ ॥ कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत । शरीरे जगतश्चास्मिन् वर्तते मे महद्भयम् ॥ ९ ॥ त्वत्पादकमलादन्यन्नमे जन्मांतरेष्वपि । निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥ १० ॥ विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमुत्तमम् । जन्मांतरेपि मे देव माभूदस्यपरिक्षयः ११ दुर्गतावपि जातायां त्वद्गतो मे मनोरथः । यदि नाशं न विंदेत तावतास्मि कृती सदा ॥ १२ ॥ न कामकलुषं चित्तं मम ते पादयोः स्थितम् । कामये वैष्णवत्वं च सर्वजन्मसु केवलम् ॥ १३ ॥ अज्ञानाद्यदि वा ज्ञानादशुभं यन्मयाकृतम् । क्षंतुमर्हस्यशेषेण दास्येन च गृहाण माम् ॥ १४ ॥ सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत । किंकरोस्मि हृषीकेश भूयोभूयोऽस्मि किंकरः ॥ १५ ॥ इत्येवमनयास्तुत्या स्तुत्वा देवं दिनेदिने । किंकरोस्मीति चात्मानं देवायैवं निवेदयेत् ॥ १६ ॥ न जाने कर्म यत्किंचिन्नापि लौकिकवैदिके । ननिषेधविधी विष्णो तव दासोऽस्मि केवलम् ॥ १७ ॥ दासोहं तव देवेश नार्चनादौ स्तुतौ न च । सामर्थ्यं न च मे तत्र मनोमेति प्रसादने ॥ १८ ॥ यच्चापराधं कृतवानज्ञानात्पुरुषोत्तम । भक्तस्य मम देवेश तत्सर्वं क्षंतुमर्हसि ॥ १९ ॥ अहंकारार्थकामेषु प्रीतिरद्यैव नश्यतु । त्वां प्रपन्नस्य मे चैव वर्धतां श्रीपते त्वयि ॥ २० ॥ उपचारापदेशेन कृतानहरहर्मया ।

अपचाराञ्हि सर्वज्ञ क्षमस्व मधुसूदन ॥ २१ ॥ क्वचाहं त्वति दुर्बुद्धिः क्वचात्महितवीक्षणम् । यद्धितं मम देवेश तात ज्ञापय माधव ॥ २२ ॥ सत्वं प्रसीद भगवन्कुरु मय्यनाथे विष्णोकृपां परमकारुणिकः किल त्वम् । संसारसागरनिमग्नमनन्तदीनमुद्धर्तुमर्हसि हरे करुणावशेन ॥ २३ ॥

॥ इति श्रीपंचरात्रागमे श्रीमदष्टाक्षरकल्पे जितंतेस्तोत्रे चतुर्थोध्यायः ॥

श्रीब्रह्मोवाच ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुषपूर्वज । १ अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः । महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ॥२॥ सहस्रशिरसे-तुभ्यं सहस्रनयनाय ते । सहस्रबाहवे तुभ्यं सहस्रचरणाय ते ॥ ३॥ अमूर्ताय नमस्तुभ्यं एकमूर्ताय ते नमः । अनेकमूर्तये तुभ्यमक्षयाय च ते नमः ॥ ४ ॥ व्यापिने वेद्यवेद्याय नमस्ते परमात्मने । चिन्मात्र-रूपिणे तुभ्यं नमस्तुर्यादि मूर्तये ॥ ५ ॥ अनिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥ ६ ॥ पंचात्मने नमस्तुभ्यं सर्वांतर्यामिणे नमः । नमस्ते गुणरूपाय गुणरूपानुवर्तिने ॥ ७ ॥ व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे । कलाषोडशरूपाय सृष्टिस्थित्यन्तहेतवे ॥ ८ ॥ आदिमध्यांतशून्याय तद्वते च नमोनमः । यज्ञाय यजमानाय यष्टव्याय नमोनमः ॥ ९ ॥ ईज्याफलात्मने तुभ्यं नमः स्वाध्याय-शालिने । नमः परमहंसाय नमः सत्वगुणाय च ॥ १० ॥ स्थिताय परमे व्योम्नि भूयोभूयो नमोनमः । संसारसागरे घोरे विषयावर्तसंकुले ॥ ११ ॥ अपारे दुस्तरेऽगाधे वर्तंतं कर्मभिः स्वकैः । अनाथमगतिं भीरुं दयया परया हरे ॥ १२ ॥ मामुद्धर दयासिंधो संसाराब्धेः सुदुस्तरात् । मंत्रहीनं क्रियाहीनं

भक्तिहीनं यदर्चनम् ॥ १३ ॥ तत्क्षन्तव्यं प्रपन्नानामपराधं सहिष्यसि। सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ॥ १४ ॥ किंकरोस्मि हृषीकेश भूयोभूयोस्मि किंकरः। अपराधसहस्रभाजनं पतितं भीम-भवार्णवोदके ॥ १५ ॥ अगतिं शरणागतं हरे कृपया केवलयात्मसात्कुरु। जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ॥ १६ ॥ त्वं च स्वामी गुरुर्माता पिता च मम बान्धवः। नाहं हितं प्रजा-नामि त्वां भजाम्येव केवलम् ॥ १७ ॥ बुध्यैवं मम गोविंद मुक्त्युपायेन मां हरे। त्वमेव मेऽर्थः श्रेयोमे नेदं नेदमितीति च ॥ १८ ॥ ज्ञानयोगं च मे देहि येन त्वामुपयाम्यहम्। इति विज्ञाप्य देवेशं वैश्वदेवं स्वधामनि ॥ १९ ॥ कुर्यात्पंचमहायज्ञानपि गृह्योक्तवर्त्मना। इत्यादि समयस्तस्य कथितः कमलासन ॥ २० ॥

॥ इति श्रीपंचरात्रागमे श्रीमदष्टाक्षरकल्पे हंसब्रह्मसंवादे जितंतेस्तोत्रे पंचमोध्यायः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ इति श्रीजितंतेस्तोत्रम् ॥